# उपदेशशब्दविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity

Enathur, Kanchipuram - 631561

**प्रधानांशाः**

उपदेशशब्दः भावघञन्तः इति दीक्षितमतम्

भाष्यप्रमाणम्

उपदेशशब्दः न करणघञन्तः इति निरूपणम्

उपदेशेऽजनुनासिक इत् इति सूत्रे उपदेशशब्दः भावघञन्त एव

करणघञन्तसूचकभाष्यन्तु एकदेश्युक्तिः

उपदेशशब्दः हलन्त्यम् इत्यादौ उत्तरत्रानुवर्तते इति दीक्षितसिद्धान्तप्रतिपादनम्

व्याख्यातृणामभिप्रायः

हरिदीक्षिताशयः

नागेशाशयप्रतिपादनम्

उपदेशेऽजनुनासिक इत् इति सूत्रे हलन्त्यसूत्रे उपदेशशब्दः करणघञन्त एव

वस्तुतः आलोच्यमाने सूत्रद्वयेपि उपदेशपदानावस्यकता एवेति भाष्यसिद्धान्तः

## दीक्षितनागेशमतरीत्या उपदेशशब्दविचारः

**उपदेशेऽजनुनासिक इत्**[1] इति सूत्रे उपदेशशब्दः भावघञन्तः। उपदेशनम्=उपदेशः।उपशब्दस्याद्यर्थकत्वात्, दिशधातोः उच्चारणार्थकत्वाच्च उपदेशशब्दस्य आद्योच्चारणमित्यर्थः। उच्चारणे आद्यत्वञ्च अज्ञातस्वस्वरूपज्ञापकत्वम्। उच्चारणक्रियायां कर्त्तारश्च प्रकृतशास्त्रप्रवर्त्तकाचार्या एव। एवञ्च अज्ञातस्वस्वरूपज्ञापकप्रकृतशास्त्रप्रवर्त्तकाचार्यकर्तृकोच्चारणं भावघञन्तोपदेशशब्दार्थः।

अत एव=उपदेशशब्दस्य भावघञन्तत्वादेव प्रकृतसूत्रभाष्ये **प्रत्यक्षमाख्यानमुपदेशः**[2] इति, **आदेच उपदेशेऽशिति**[3] इति सूत्रभाष्यप्रदीपे **येषां स्वरूपज्ञापनाय अपूर्वमुच्चारणं तेषामेव उपदेशव्यवहारः**[4] इति, **एकाच**

---

[1]. 1-3-1(अष्टाध्यायी)

[2]. 1-3-1(अष्टाध्यायी),महाभाष्यम्,पृ-126,चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

[3].6-1-45(अष्टाध्यायी)

**उपदेशोऽशिति**[5] इति सूत्रभाष्यप्रदीपे **इत्संज्ञाविधौ उच्चारणवचनः उपदिशिर्गृह्यते**[6] इति च उक्तं सङ्गच्छते।[अत्र प्रकृतसूत्रभाष्यम् एवं वर्तते- [7]उपदेश इति किमर्थम्?अभ्र आ अपः। उद्देशे यो अनुनासिकः तस्य मा भूदिति। **कः पुनरुद्देशोपदेशयोर्विशेषः? प्रत्यक्षमाख्यानमुपदेशः।गुणैःप्रापणमुद्देशः।**प्रत्यक्षंतावदाख्यानमुपदेशः।तद्यथा- अगोज्ञायकश्चिद्गां सक्थनि कर्णे वा गृहीत्वा उपदिशति अयं गौः इति। स प्रत्यक्षमाख्यातमाह- उपदिष्टो मे गौः इति। **गुणैः प्रापणमुद्देशः।** तद्यथा- कश्चित्कंचिदाह-देवदत्तं मे भवानुद्दिशतु इति। स इहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति **अङ्गदी कुण्डली किरीटी व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासो विचित्राभरणो ईदृशो देवदत्तः** इति। स गुणैः प्राप्यमाणमाह **उद्दिष्टो मे देवदत्तः** इति। (इन्द्रियार्थगोचरस्य यदाख्यानं सः उपदेशः। प्रसिद्धधर्मोपादानेन तु यत्प्रतिपादनं स उद्देशः इति विवेकः।) लक्षणेनापि ह्युपदेशः। संकीर्णावुद्देशोपदेशशब्दौ। **प्रत्यक्षमप्याख्यानमुद्देशः, गुणैश्चप्रापणमुपदेशः।** प्रत्यक्षं तावदाख्यानमुपदेशः। तद्यथा- कश्चित्कंचिदाह-**अनुवाकं मे भवानुद्दिशतु** इति। स तस्मायाचष्टे-**इषेत्वकमधीष्व शंनोदेवीयकमधीष्व** इति। स प्रत्यक्षमाख्यातमाह- **उद्दिष्टो मे अनुवाकस्तमध्येष्ये** इति। **गुणैश्चप्रापणमुद्देशः**। तद्यथा कश्चित्कंचिदाह- **ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशतु** इति। स तस्मायाचष्टे **अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः , अमुष्मिन्हस्तवामः** इति। स गुणैः प्राप्यमाणमाह **उपदिष्टो मो पन्थाः** इति। एवमेतौ संकीर्णौ इति।]

उपदेशशब्दस्य करणघञन्तत्वं नोचितम्। **अकर्तरि च कारके संज्ञायाम्**[8] इति सूत्रेण करणार्थे प्राप्तस्य घञः **करणाधिकरणयोश्च**[9] इति सूत्रविहितल्युटा बाधात्। **पुंसि संज्ञायां घः प्रायेण**[10] इति सूत्रेण घप्रत्ययोऽपि न भवति। उपदेशशब्दस्य असंज्ञात्वात्। अत एव घापवादः**हलश्च**[11] इति सूत्रविहितः घञपि न भवति। **कृत्यल्लुटो बहुलम्**[12] इति सूत्रे बहुलग्रहणात् करणार्थे घञ्साधनन्तु अगतिकगतिः।

---

4. तत्रैव पर्दीपे वर्तते। महाभाष्यम्,पृ-55,चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

5.7-1-96(अष्टाध्यायी)

6. अत्रैव प्रदीपे वर्तते, महाभाष्यम्,पृ-55,चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

7.उपदेशेजनुनासिक इत(1-3-2) महाभाष्यम्-पृ-126-127,चौखाम्बासंस्कृतप्रतिष्छान, दिल्ली

8. 3-3-19(अष्टाध्यायी)

9. 3-3-117(अष्टाध्यायी)

10 . 3-3-118(अष्टाध्यायी)

11. 3-3-121(अष्टाध्यायी)

12.-3-3-113(अष्टाध्यायी)

भावघञन्तः उपदेशशब्दः उत्तरत्र **हलन्त्यम्**[13] इति सूत्रेऽपि अनुवर्तते। अत एव **तस्मिन्निति निर्दिष्टे पूर्वस्य**[14]" इति सूत्रभाष्ये[15]**तस्मिन्निति, तस्मादिति** परिभाषयोः षष्ठीप्रकल्पकत्वमिति पक्षे **गुप्तिज्किद्भ्यः सन्**[16] इत्यत्र सनः षष्ठीप्रकल्पने तत्र आदेशान्तरनिर्देशाभावेन अन्तरतमपरिभाषया **सनः सनेवाऽदेशो भवति** इति सिद्धेऽपि अनुमितस्य सनः पाणिन्युच्चारणाभावेन तत्र नकारस्य इत्संज्ञा न स्यात्, इत्यभिप्रयकम् **उपदेशे इत्युच्यमाना इत्संज्ञा न प्रकल्पेत** इत्युक्तम्। भावघञन्तस्य उपदेशशब्दस्य हलन्त्यसूत्रे अननुवृत्तौ तु एतद्भाष्यं विरुध्येत। एतद्भाष्यप्रामाण्यात्, करणे घञ्विधायकाभावाच्च कृत्यल्लुटो बहुलम् इति भाष्यस्य प्रौढिवादत्वं स्वीकार्यमिति दीक्षिताशयः। स्पष्टं चेदं सर्वं प्रौढमनोरमायाम्[17]।

**अत्रायं दीक्षितस्याशयः**

1.उपदेशेऽजनुनासिक इत् इति सूत्रे उपदेशशब्दः भावघञन्त एव।

2.करणघञन्तसूचकभाष्यन्तु एकदेश्युक्तिः।

3.उपदेशशब्दः हलन्त्यम् इत्यादौ उत्तरत्रानुवर्तते। इति।

**अत्र हरिदीक्षिताशयः**

हलन्त्यसूत्रे भाष्ये[18] सर्वोपि हल् तं तं समुदायं प्रत्यन्तः भवतीति कृत्वा सर्वस्य हलः इत्संज्ञा प्राप्नोतीति तद्दोषवारणार्थं **सिद्धं तु व्यवसितान्त्यत्वात् इति वार्तिकमारब्धम्। के पुनर्व्यवसिताः? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः** इति तत्र भाष्यम्। वस्तुतः आलोच्यमाने उपदेशशब्दस्य प्रत्ययादिपरत्वे=भाष्योक्तकरणव्युत्पत्या प्रत्ययाद्यर्थकत्वे तस्यैव उपदेशशब्दस्यैव हलन्त्यमित्यत्रान्वयेन यत्किंचित्समुदायान्त्यस्य वारणसम्भवे तदर्थम्= यत्किञ्चित्समुदायान्त्यवारणार्थम् अन्त्यग्रहणसामर्थ्यादिवर्णनक्लेशः भाष्यकृतः व्यर्थः स्यात्। अतः भावघञि बाधकाभावः इति ।स्पष्टं चेदं सर्वं शब्दरत्ने[19]।

**अत्र नागेशाशयः**

---

[13].1-3-3(अष्टाध्यायी)

[14].1-1-66(अष्टाध्यायी)

[15].तस्मिन्निति निर्दिष्टे पूर्वस्य महाभाष्यम्-पृ-544,चौखाम्बासंस्कृतप्रतिष्ठान, दिल्ली

[16]. 3-1-50(अष्टाध्यायी)

[17].सटीकटिप्पणीशब्दरत्नप्रौढमनोरमा, पृ-39-42

[18]. 1-3-3(अष्टाध्यायी)।,महाभाष्यम्,पृ-129,चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

[19].सटीकटिप्पणीशब्दरत्नप्रौढमनोरमा, पृ-42-46, चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV

उपदेशशब्दस्य भावघञन्तत्वे **अज्ञातस्वस्वरूपज्ञापकोच्चारणे अनुनासिकाचः इत्संज्ञः स्यात्** इति **उपदेशेऽजनुनासिक इत्** इति सूत्रस्यार्थः सम्पद्यते। तस्यैव हलन्त्यमिति सूत्रे अनुवृत्तौ **अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायान्त्यं हल् इत्संज्ञं** स्यात् इति हलन्त्यसूत्रार्थः पर्यवस्यति। तथा च यस्य शब्दस्य अज्ञातस्वस्वरूपज्ञापकमपूर्वं पाणिनिमहर्षैः उच्चारणं भवति, तत्र स्थितानामेव पूर्वसूत्राभ्यामित्संज्ञा सिध्यति।

तदा **लृटः सद्वा**[20] इति सूत्रविहितयोः सत्पदोपस्थाप्ययोः शतृशानचोः, **निष्ठा**[21] इति सूत्रविहितयोः निष्ठापदोपस्थाप्ययोः क्तक्तवत्वोश्च पाणिन्युच्चारणाभावात् तत्रत्यानाम्- ऋ, च्, उ-वर्णानामित्संज्ञा न स्यात्।

किञ्च **राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्या व्यथ्याः**[22], **चित्याग्निचित्ये च**[23] इत्यादि सूत्रैः राजसूयादयः शब्दाः निपात्यन्ते। तत्र प्रकृतिप्रत्ययाद्यनिर्देशात् तज्ज्ञापनाय राजोपपदकात् सुधातोः क्यप् इत्यादीनि वाक्यानि पाणिनितात्पर्यानुसारेण अनुमीयन्ते। तत्रानुमीयमानवाक्यघटकस्य क्यपः पाणिन्युच्चारणाभावात् पकारादेः इत्वं न स्यात्।

न च अनुमितस्य क्यपः अनुच्चारणेऽपि तस्यैव **वदः सुपि क्यप् च**[24] इति सूत्रे उच्चारणमस्तीति इत्संज्ञा सुलभैवेति वाच्यम्। वदधातूत्तरं विधीयमानस्य क्यपः, राजोपपदकसुधातोः विधीयमानस्य क्यपश्च भिन्नसम्बन्धित्वेन तयोः भेदात् तत्र उच्चारणस्य अत्र इत्संज्ञाऽप्रयोजकत्वात्। अतएव=एकसम्बन्धिनः अपरसम्बन्धित्वाभावादेव **तस्यापत्यमतइञ्** इत्येकयोगे कृते उदन्तशब्दार्थसम्बन्ध्यपत्यस्य अनुक्तत्वेन तस्य शेषत्वात् अणं बाधित्वा भानुशब्दात् **वृद्धाच्छः**[25] इति छप्रत्ययः स्यात्। अतः योगविभागः इत्युक्तं भाष्ये। अपत्यार्थस्य एकत्वेऽपि अदन्तशब्दार्थसम्बन्धम्, उदन्तशब्दार्थसम्बन्धं पुरस्कृत्य भेदः यथा स्वीक्रियते तद्वत् वदधातुसम्बन्धम्, राजोपपदक सुधातुसम्बन्धञ्च पुरस्कृत्य उभयोः क्यपोः भेदः अङ्गीकार्यः। ततश्च क्यपः इत्संज्ञाप्राप्तिः दोष एव।

किञ्च **भवतष्ठक्छसौ**[26] इत्यादौ द्वन्द्वनिर्देशस्थले अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयत्वं ठक-छस् समुदाये एवास्ति। अतः समुदायान्त्यस्य इत्संज्ञाप्रवृत्तावपि ठकि ककारस्य तदन्त्यत्वाभावात् हलन्त्यमिति इत्संज्ञा न

---

[20]. 3-3-14(अष्टाध्यायी)

[21].3-2-102(अष्टाध्यायी)

[22]. 3-1-114(अष्टाध्यायी)

[23]. 3-1-132(अष्टाध्यायी)

[24]. 3-1-106(अष्टाध्यायी)

[25]. 4-2-114(अष्टाध्यायी)

[26].4-2-115(अष्टाध्यायी)

स्यात्। किंञ्च चित्रङ् इत्यत्र ङकारस्य **घ्वसोरेद्धावभ्यासलोपश्च**[27] इति सूत्रे लोपश्च इत्यत्र भाष्ये प्रश्लिष्टशकारस्य च अक्षरसमाम्नाये ज्ञातत्वात् अज्ञातस्वस्वरूपज्ञापकोच्चारणाभावात् इत्संज्ञा न स्यात्। किच **नदट्,चोरट्** , **चु,कु** इत्यादि प्रातिपदिकानाम् **उद्देशश्च प्रातिपदिकानां नोपदेशः**, इति **उपदेशेऽजनुनासिक इत्** इति प्रकृतसूत्रभाष्येण उपदेशत्वाभावबोधनात् तत्रस्थानामित्संज्ञा न स्यात्। अतः उपदेशशब्दः करणघञन्त एव स्वीकार्यः। उपदिश्यते अनेन इति उपदेशः=शास्त्रम्। **प्रयोगशासनकरणभूताः धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः** उपदेशपदेन व्यवह्रियन्ते।

सत्पदोपस्थाप्ययोः शतृशानचोः, निष्ठापदोपस्थाप्ययोः क्तक्तवत्वोः निपातनानुमितक्यबादीनां, द्वन्द्वनिर्दिष्टयोः ठक्छसोः, चित्रङ् इत्यत्र ङकारस्य लोपश्च इत्यत्र प्रश्लिष्टशकारस्य कु चु इत्यादिप्रातिदिकानाञ्च अपूर्वोच्चारणाभावेऽपि प्रयोगशासनकरणभूतत्वात् तत्रत्यानामित्संज्ञा सुलभैव। अत एव उपदेशशब्दस्य भावघञन्तत्वे **प्रत्यक्षमाख्यानमुपदेशः** इत्यङ्गीकारे च इष्टस्थले इत्संज्ञा न प्राप्नोतीति आलोच्य वार्तिककारेण **उपदेशनेऽजनुनासिक इत्** इत्यर्थकं करणल्युडन्तघटितन्यासान्तरमाश्रितम्। भाष्यकारेण च सिध्यत्येवम्, सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु --- एवं तर्हि**कृत्यल्लुटो बहुलम्** इत्येवमत्र घञ् भविष्यतीत्युक्तम्। उपदेशशब्दस्य करणघञन्तत्वादेव **उदस्वित्** इत्यादि प्रातिपदिकान्त्यस्यापि इत्वे प्राप्ते तद्वारणार्थं **प्रातिपदिकानां प्रतिषेधः वक्तव्यः अकृत्तद्धितान्तानाम्**[28] इति वार्तिकमारब्धं वार्तिककृता। भावघञन्तत्वे तु प्रातिपदाकानामुपदेशत्वाभावात् तदन्त्यस्य इत्वाप्राप्तौ तत्र प्रतिषेधारम्भः व्यर्थ एव स्यात्। तस्मात् उपदेशशब्दः करणघञन्त एव स्वीकार्यः इति ।

**अत्र चित्रप्रभाकाराः**[29]

उपदेशशब्दः भावघञन्त एव। न च **लृटः सद्वा** इति सूत्रविहितयोः सत्पदोपस्थाप्ययोः शतृशानचोः ऋकार-ककारयोः इत्संज्ञा न स्यादिति वाच्यम्। **लटः शतृशानचावप्रथमासमानाधिकरणे**[30] इति सूत्रात् शतृशानचोः अनुवर्तनेनैवसिद्धे पुनः इत्संज्ञाविधायके **तौ सत्**[31] इति सूत्रे तौ ग्रहणं व्यर्थं सत् पूर्वत्र यादृशौ इत्संज्ञकशकाराद्युपलक्षितौ तादृशयोरेव सत्संज्ञा इति बोधयति। ततश्च इत्संज्ञकशकारादिविशिष्टयोः अत्-आनयोः एव सत्संज्ञाविधानात् तादृशयोरेव सत्पदादुपस्थित्या पुनः तत्र नास्ति इत्संज्ञावसरः।

---

27.6-4-119(अष्टाध्यायी)

28. हलन्त्यम् 1-3-3(अष्टाध्यायी)।,महाभाष्यम्,पृ-129,चौखाम्बा संस्कृतप्रतिष्ठान् ,दिल्ली

29.चित्रप्रभा,आन्ध्रविश्वविद्यालयः,वाल्टेरु, पृ-17

30.3-2-124(अष्टाध्यायी)

31.3-2-127(अष्टाध्यायी)

निष्ठापदोपस्थाप्य क्त-क्तवतु विषयेपि नैव दोषः। **क्तक्तवतूनिष्ठा** इति तु न संज्ञासूत्रम्। किन्तु **अचश्च** इतिवत् परिभाषासूत्रम्। यत्र निष्ठापदं तत्र क्त-क्तवतू इत्युपतिष्ठेते इति तत्सूत्रार्थः। एवञ्च निष्ठा पदघटितसूत्रे क्तक्तवत्वोः उपस्थित्या स्वरूपत एव तयोः विधानात् परिभाषोपस्थितयोरपि अनयोः अनुवृत्तयोरिव उपदेशविषयत्वेन इत्संज्ञाप्रवृत्तौ बाधकाभावात्।

**राजसूयसूर्यमृषोद्यरुच्यकृष्टपच्या व्यथ्याः, चित्याग्निचित्ये च** इत्यादि सूत्रेषु निपातनानुमितक्यबादीनां पादेः इत्संज्ञावसर एव नास्ति, पित्वकित्वादिधर्मवतः यप्रत्ययस्यैव निपातनाभ्युपगमात्। न च इत्संज्ञायाः अपि निपातनाभ्युपगमे गौरवमिति वाच्यम्। फलमुखगौरवस्यादोषत्वात्।**भवतष्ठक्छसौ** इत्यत्रापि न दोषः। अज्ञातस्वस्वरूपज्ञापनतात्पर्यकोच्चारणस्यैव उपदेशपदार्थतया द्वन्द्वस्थले पृथग्विधेयत्वानुपपत्या प्रत्येकमेव तात्पर्यकल्पनया तथाविधतात्पर्यविषयीभूतोच्चारणगोचरसमुदायत्वपर्याप्तेः ठगादावपि द्वन्द्वघटके निर्विवादत्वेन दोषाभावात्।**घ्वसोरेद्धावभ्यासलोपश्च** इत्यत्र प्रश्लिष्यमाणशकरस्य अक्षरसमाम्नायद्वारा ज्ञातत्वात् अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयत्वाभावात् इत्संज्ञा न स्यादिति नाशङ्कनीयम्, प्रश्लेषसामर्थ्यादेव तत्र इत्वसिद्धेः। किञ्च विधेयगतसर्वादेशत्वरूपविशेषसमर्पकत्वेन तदुच्चारणस्य अपूर्वत्वेन उपदिश्यमानत्वस्य अक्षतत्वात्।अतः उपदेशशब्दस्य भावघञन्तत्वपक्षे ये दोषाः करणघञन्तवादिभिः प्रदर्शिताः ते सर्वेपि निराकृता एव।एवञ्च दीक्षितोक्तदिशा बाहुलकात्करणे घञ् इति भाष्यस्य प्रौढिवादित्वं स्वीकृत्य उपदेशशब्दस्य भावघञन्तत्वस्वीकार एव उचितः एतेषां महानुभावानामाशयः।

**अयमत्र दीक्षितमतसंग्रहः**

1.उपदेशशब्दः भावघञन्तः।

2.भावघञन्तस्य उपदेशशब्दस्य हलन्त्यसूत्रे अननुवृत्तौ तु भाष्यं विरुध्येत। एतद्भाष्यप्रामाण्यात्, करणे घञ्विधायकाभावाच्च कृत्यल्लुटो बहुलम् इति भाष्यस्य प्रौढिवादत्वं स्वीकार्यमिति।

**नागेशमतसारः**

1.उपदेशेऽजनुनासिक इत् इति सूत्रे हलन्त्यसूत्रे उपदेशशब्दः करणघञन्त एव।

2.वस्तुतः आलोच्यमाने सूत्रद्वयेपि उपदेशपदानावस्यकता एवेति भाष्यसिद्धान्तः।

***********************

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV